शेफालिः, स्त्री, (शेरते इति शेफाः शयनशालिन-
स्तादृशा अलयो भृङ्गा यत्र ।) शेफालिका ।
इति शब्दरत्नावली ॥

शेफालिका, स्त्री, (शेफालि + स्वार्थे कन् ।) पुष्प-
वृक्षविशेषः । शिउली इति भाषा ॥ (यथा,—
"शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभुः सा ।
आकर्ण्य सम्प्रति रुतं चरणायुधानां
किंवा व्यवस्यति न वेद्मि तपस्विनी सा ॥"
इत्युद्भटः ॥)
तत्पर्य्यायः । सुवहा २ निर्गुण्डी ३ नीलिका ४ ।
इत्यमरः ॥ चत्वारि शेफालिकामात्रे । शिय-
लीति ख्यातनीलपुष्पायां शेफालिकामिति
केचित् । शेफालिकादिद्वयं शेफालिकामात्रे
निर्गुण्ड्यादिद्वयं नीलपुष्पशेफालिकायामिति
केचित् । इति तट्टीकायां भरतः ॥ शेफाली ५
मल्लिका ६ रजनीहासा ७ निशिपुष्पिका ८ ।
सा शुक्ला चेत् श्वेतसुरसा ९ भूतवेशी १० ।
इति शब्दरत्नावली ॥ शुक्लाङ्गी ११ शीत-
मञ्जरी १२ विजया १३ वातारिः १४ भूत-
केशी १५ । अस्या गुणाः । कटुत्वम् । तिक्त-
त्वम् । उष्णत्वम् । रूक्षत्वम् । वातकफाङ्ग-
सन्धिवातगुदवातादिदोषनाशित्वञ्च । इति
राजनिर्घण्टः ॥

शेफाली, स्त्री, (शेफालि + कृदिकारादिति वा
ङीष् ।) शेफालिका । इति शब्दरत्नावली ॥
नीलसिन्धुवारः । इति भावप्रकाशः ॥

शेमुषी, स्त्री, (शेते इति शेः मोहः । शी + विच्
तं मुष्णातीति । मुष स्तेये + मूलविभुजादित्वात्
कः । गौरादित्वात् ङीष् । इत्यमरटीका ।)
बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, राज-
तरङ्गिण्याम् । ३ । २०६ ।
"खिन्नस्य हि विपर्य्येति तत्त्वज्ञस्यापि शेमुषी ॥")

शेल ऋ चालगत्योः । इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-सक०-सेट् ।) ऋ, अशिशेलत् ।
इति दुर्गादासः ॥

शेलुः, पुं, (शेलतीति । शेल गतौ + उः ।) बहु-
वारकवृक्षः । इत्यमरः ॥ (यथा, सुश्रुते ।४।३८।
"विदार्य्यैरावतीशेलुशाल्मलीधवलाङ्कुराः ॥"
तत्फलमपि । यथा, मनुः । ५ । ६ ।
"शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥")

शेवः, पुं, (शेते रेतःपातानन्तरमिति । शी + "इण्
शीङ्भ्यां वन् ।" उणा० १ ।१५२। इति वन् ।
मेढ्रः । अहिः । उच्चते, त्रि । इत्युणादिकोषः ॥
(क्ली, सुखम् । इति निघण्टुः । ३ । ६ ॥ त्रि,
सुखकरम् । यथा, ऋग्वेदे । १ । ५८ । ६ ।
"मित्रं न शेवं दिव्याय जन्मने ॥"
"मित्रं न शेवं यथा सखा सुखकरो भवति
तद्वत् सुखकरमित्यर्थः ।" इति तद्भाष्ये सायणः ॥)

शेवधिः, पुं, (शेवं सुखं धीयतेऽस्मिन्निति । धा +
कः ।) निधिः । इत्यमरः ॥ (यथा, मनुः ।
२ । ११४ ।
"विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम् ।
असूयकाय मां मादास्तथास्यां वीर्य्यवत्तमा ॥"

शेवलं, क्ली, शैवालम् । इति शब्दरत्नावली ॥
(मनुष्यनाम । इति पाणिनिः । ५ । ३ । ८४ ॥)

शेवलिनी, स्त्री, (शेवलं शैवालमस्या अस्तीति ।
इनिः ।) नदी । इति राजनिर्घण्टः ॥

शेवालं क्ली, (शेते जले इति । शी + "शीङो
धुक्लग्वलञ् वालनः ।" उणा० ४ । ३८ । इति
वालन् ।) शैवालम् । इति शब्दरत्नावली ॥
(यथा, राजेन्द्रकर्णपुरे । २५ ।
"शङ्के पङ्के पतति यतते बालशेवालमूले
कूले लोलः किमपि कुरुते कर्म्म वैकुण्ठकूर्म्मः ॥"

शेवाली, स्त्री, आकाशमांसी । इति राजनिर्घः ॥

शेषं, क्ली, (शिष्यते यदिति । शिष + घञ् ।)
प्रसादः । इति मेदिनी । षे, २८ ॥

शेषः, पुं, (शेषति सङ्कर्षतीति । शिष हिंसायाम्
+ अच् ।) सङ्कर्षणः । स तु बलदेवः । (यथा,
माघे । २ । ६८ ।
"निशम्य ताः शेषगवी रभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमादिशत् दृशा ॥"
शिष वधे + भावे घञ् ।) वधः । अनन्तः । स
च सर्पराजः । इति मेदिनी ॥ (यथा, कुमारे ।
३ । १ ।
व्यादिश्यते भूधरतामवेक्ष्य
कृष्णेन देहोद्वहनाय शेषः ॥")
तस्य ध्यानं यथा,—
"फणासहस्रसंयुक्तं चतुर्ब्बाहुं किरीटिनम् ।
नवाम्रपल्लवाकारं पिङ्गलश्मश्रुलोचनम् ॥
पीताम्बरधरं देवं शङ्खचक्रगदाधरम् ।
कराग्रे दक्षिणे पद्मं गदां तस्याप्यधःकरे ।
दधानं सर्व्वलोकेशं सर्व्वाभरणभूषितम् ।
क्षीराब्धिमध्ये श्रीमन्तमनन्तं पूजयेत्ततः ॥"
इति भविष्यपुराणम् ॥
गजः । नागः । स्वीकृतेतरवस्तु । इत्यजयपालः ॥
भगवतो द्वितीया मूर्त्तिः । यथा,—
"एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ॥"
इति कौर्म्मे ४८ अध्यायः ॥
शेषशयनप्रकारो यथा,—
"अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः ।
तत्र स्वयं श्रिया युक्तं सुषुप्तं जनार्द्दनम् ॥
तस्योपधानमकरोदनन्तो दक्षिणां फणाम् ।
उत्तरां पादयोश्चक्रे उपधानं महाबलः ।
तालवृन्तं तदा चक्रे स शेषः पश्चिमां फणाम् ॥
स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम् ॥
शङ्खं चक्रं नन्दकासिमिषुधी द्वे महाबलः ।
ऐशान्याथ फणया स दध्रे गरुडं तदा ॥
गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम् ।
यानि चान्यानि तस्यासन्नाग्नेय्या फणया दधौ ॥
एवं कृत्वा स्वकं काय शयनीयं तदा हरेः ।
भूतभव्यजगन्नाथं परापरपतिं हरिम् ॥
दधार शिरसानन्तः स्वयमेव स्वकां तनुम् ।
एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः ।
सन्ध्याञ्च समधिप्राप्य शेते नारायणोऽव्ययः ॥"
इति कालिकापुराणे २७ अध्यायः ॥

शेषः, पुं, क्ली, (शिष्यते इति । शिष + घञ् ।)
उपयुक्तेतरवस्तु । इति मेदिनी ॥ शेषोऽवशिष्ट-
मवशिष्टता च शेषः शेषश्चेत्यादि । अनन्ते तु
शेषः पुंलिङ्ग एव शिष्टप्रयोगात् । उक्तादन्यः
शेषः यथा । शङ्खपद्मौ निधिवाचकौ पुंलिङ्गौ
जलजे तूभयलिङ्गौ इति सर्व्वानन्दः । इत्यमर-
टीकायां भरतः ॥ *॥ ऋणादिशेषरक्षणनिषेधो
यथा,—
"ऋणशेषञ्चाग्निशेषं शत्रुशेषं तथैव च ।
पुनः पुनः प्रवर्द्धन्ते तस्मात् शेषं न कारयेत् ॥"
इति गारुड़े ११६ अध्यायः ॥
(अवशिष्टे, त्रि । यथा, रघुः । ४ । ६४ ।
"अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ॥"
तथाच रामायणे । २ । २६ । ३२ ।
"वन्दितव्यस्त्वया नित्यं याः शेषा मम मातरः")

शेषत्वं, क्ली, (शेषस्य भावः । शेष + त्व ।) उप-
कारित्वम् पारार्थ्यम् । परोद्देश्यप्रवृत्तिकत्वम् ।
यथा,—
"शेषत्वमुपकारित्वं द्रव्यादावाह वादरिः ।
पारार्थ्यं शेषता तच्च सर्व्वेष्वस्तीति जैमिनिः ॥"
इत्यधिकरणमालायां माधवाचार्य्यः ॥
शेषस्य भावः । इति व्याकरणम् ॥

शेषरात्रिः, स्त्री, (शेषा अवशिष्टा रात्रिः ।)
रात्रिशेषः । तत्पर्य्यायः । उच्चन्द्रः २ अपरात्रः
३ । इति शब्दरत्नावली ॥

शेषा, स्त्री, (शिष्यतेऽसौ । शिष् + घञ । टाप् ।)
स्वनिर्म्माल्यार्पणम् । इति मेदिनी । (यथा,
कुमारे । ३ । २२ ।
"तथेति शेषामिव भर्त्तुराज्ञा-
मादाय मूर्द्ध्ना मदनः प्रतस्थे ॥")

शैक्षः, पुं, (शिक्षामधीते इति । शिक्षा + अण् ।)
प्राथमकल्पिकः । इत्यमरः ॥ द्वे प्रथमारब्ध-
वेदाध्ययने । शिक्षणं शिक्षा । सेमल्लात् सरो-
रिति अः । शिक्षा प्रथमोपदेशः तत्साह-
चर्य्यात् ग्रन्थोऽपि शिक्षा तामधीयते शैक्षाः ।
ढ़के कादिति णः प्रथमं शिक्षणीयं कल्पं शास्त्रं
अधीयते प्राथमकल्पिकाः । इति भरतः ॥
(शिक्षा शीलमस्येति । "छत्रादिभ्यो णः ।"
४ । ६२ । इति णः । शिक्षाशीले, त्रि ॥)

शैक्षिकः, त्रि, शिक्षाशास्त्रवेत्ता । शिक्षां वेत्ति
अधीते वा इत्यर्थे ष्णिकप्रत्ययेन निष्पन्नः ॥

शैखरिकः, पुं, (शिखरे प्रायेण भवतीति । शिखर
+ ठञ् ।) अपामार्गः इत्यमरः ॥

शैखरेयः, पु, (शिखरे भवः । शिखर + ढ़ञ् ।)
अपामार्गः । इति भरतधृतरत्नकोषः ॥

शैत्यं, क्ली, (शीतस्य भावः । शीत + "वर्णदृढ़ा-
दिभ्यः ष्यञ् च ।" ५ । १ ।१२३। इति ष्यञ् ।)